This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2308 विषय

नाव रासपंचाध्यायी (mss)

लेखक / लिपीकार

पृठ 09 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2308

४

अतीवमेप्रियासीति कथयामितवप्रिये॥ रूपाणि बहुसंख्यानि प्रस्तुतेः संतिभाविनी॥
तेषांमध्यप्रधानंतु कालीरूपंमनोहरं॥ विशेषतः कलियुगनराणां भुक्तिमुक्तिदं॥ त
स्याउपासकाश्चैव ब्रह्म विष्णुशिवादयः॥ चंद्रः सूर्यश्च वरुणः कुबेराग्निस्तथाप
रः॥ दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः॥ बहुनाकिमिहोक्तेन सर्वे देवाउपा
सकाः॥ कालिकायाप्रसादेन भुक्तिमुक्त्यादिभागिनः॥ उत्तरतंत्रे॥ प्रधानाप्रकृतिःका
लीत्रिगुणाद्वैतरूपिणी॥ शृंगारलीलानिरतावीरभावसमावृता॥ अद्वैतरूपाकालि
केन तस्याः शृंगारलीलासंगतिर्जायते॥ कालिकासंदर्भस्वांगप्रूपभेदेन स्वयंशृं
गाररूपिणी॥ श्रीआनंदरसेमग्नाद्वैतरूपाचुचिन्मयी॥ तत्रतंत्रे च्छयासर्वमिदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वंचराचरं॥ जायते नचतल्लीलाभं गोवापि कन्दाचिका चित्॥ तद्रूपं मनुमात्रं
तु ब्रह्मविष्णुशिवादयः॥ ध्यायंति ते पूज्यतराः सृष्टिसंहारकारकाः॥ विनातत्
पयाकुत्र कस्य मुक्तिर्न दृश्यते॥ अतः सर्वभक्तानुग्रहाभ्यामृता स्वात्माभिन्नं वर्ति
नानेहरसमग्रेन महाकालेन महामंत्रवर्ण्यकस्वरभेदगीतेन मंत्रध्यानयंत्रसाध
नभेदादिस्तुतिरारंभे॥ यथोत्तरतंत्रवीरतंत्रतंत्रांतरेषु॥ पूज्यपितामहाकालीस्व
रूपाख्यं पठेत्तु यः॥ स्तोत्रं पापप्रणाशं च सद्यः कैवल्यकारणं॥ किं वाचार्थं चवि
ज्ञायस्वरगीतेन नैवोलजे॥ स्तोत्रं वा किंच श्लोकं वा श्लोकार्द्धं [redacted] वा निशार्द्ध ॥१२॥
तः॥ पठेदिमोहयेद्विश्वमिदं सर्वं चराचरं॥ सर्वमाकर्षति विश्वं द्रवीभवति देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा३॥ प्रवृत्तिर्वै महेश्वानी वश्री कुर्यज्जिगत्रयं॥ स्तंभये द्दरिवलंसर्वं ज्योतिश्च
कं जलंपरं॥ गीतंमर्थंपिरं चास्य तत्वं जानातिकेशवः॥ वेद्म्यहंवेत्तिब्रह्मा च किंचि
ज्जानातिनारदः॥ वेदव्यासःतद्दहं तु नान्योवेत्तिकदाचन॥ एतद्वीतेन श्रीकृ
ष्णागोपिकाणमाकर्षं यतित्वंश्रमपि स्तंभयेत्॥ तथाश्रीभागवते॥ भगवानपि
तारात्रीः शरदोत्फुल्लमल्लिकाः॥ वीक्ष्यरंतुं मनश्चक्रे योगमायामुपाश्रितः॥ रं
ष्णापिरंतुं लतासाधनंकर्तुंमनश्चक्रे॥ योगमायां भगवतीं महाकालीमुपाश्रि
तः॥ आलंब्यउपासनं कृतेति भावः॥ ११ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमानना
भं नवकुंकुमारुणं॥ वनंच तत्कोमलगोभिरंजितं जगौ कलंवामदृशां मनोहरं॥ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ अलं मधुरं गोप्याकर्षकं जगो वामदृशां गोपीनां मनोहरं चित्तहारकं ॥ तेन कुमुद्वत

कं कुमाराणां ॥ कलज्ञा ब्दात् ककारः ॥ मनोहरा द्रेफ स्तत्र युक्तः ॥ वामदृशो ईकारः ॥ अखंड

मंडलं बिंदु स्तत्र युक्तः ॥ क्लीं इति बीजं जातं एतत्रिबीजं स्तुति प्रथमे दर्शितं ॥ इ सन

न स्तव गीतं सूचितं ॥ ॥ तत्फलं यथा ॥ निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्ण

गृहीतमानसाः ॥ आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोल

कुंडलाः ॥ २ ॥ एतत्स्तुत्यर्थो श्रीव्यासदेवेन रासपंचाध्याये वर्णितः ॥ तथा ब्रह्म

वैवर्ते ॥ गोलोके रासमंडले कृष्णस्तत्र राधापूजां ते ॥ सरस्वती गानानंतरे ब्रह्मणा

प्रेरितः ॥ शंभुरेतं स्तोत्रं जगौ ॥ तस्मिन्नंतरे शंभुर्ब्रह्मणा प्रेरितां मुहुः ॥ जगौ ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रहृति संगीतंरासोल्लाससमन्वितं॥ मूर्च्छांप्रापुः सुराः सर्वेचित्रपुत्तलिकायथा॥
क्षणेनचेतनांप्राप्य ददृशूरासमंडलं॥ स्थलंसर्वंजलाकीर्णंराधाकृष्णविहीनकं॥ अस्तुवंस्ते रुरुदुः सर्वेगोपागोप्यःसुराद्विजाः॥ ध्यानेनब्रह्माबुबुधेसर्वंसत्वमभीप्सितं॥ गतश्चराधयासार्द्धं श्रीकृष्णोद्रवतामिति॥ अत्रहसाचम
राकाल्याः संगीतंमंत्रादिरचितस्वरूपाख्यस्तोत्रंस्वरभेदैरिति॥ किंचित्तद
थाधुनास्वात्मबोधायक्रीयते॥ पंचभिः श्लोकैर्महामंत्रराजेस्तां प्रस्तौतिक
कर्पूरमित्यादि॥ ॥ कर्पूरंमध्यमांत्यस्वरपररहितंसेंदुवामाक्षियुक्तंबीजं

॥४॥ ते मातरेतत्त्रिपुरहरवधुः त्रिः स्तं ये जपंति। तेषां गद्यानि पद्यानि च मुखकुहरादु
ल्लसंसेव वाचः स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिं गतानां। १॥ हे मा
तः त्रिपुरहरस्य शिवस्य वधु ते तव एतद्बीजं त्रिः स्तं त्रिरुच्चारितं त्रिवारमिति या
वत् ये जनाः साधकाः जपंति। मानसादि जपभेदेन त्रिविधरूपं वदंति। तेषां जना
नां मुखकुहरात् मुखगव्हरात् देववाचो गद्यानि पद्यानि च कारात् सैन्यादीनि स्वच्छ
दं सुंदरं यथार्थरसयुक्तं वा उल्लसंति प्रकाशं यांति। बीजं कीदृक्। कर्पूरं किंभूतं मध्य
मांत्यस्वरपररहितं मध्यमस्य वर्णस्य यो अंत्यः स्वरः अंतः समीपे अंते चेति वचन
त् । ककारात् हकारः पकारात् दकारश्च। पश्चस्वरश्च तैः रहितं संलक्षणं एतावता क्रीं इति अव ॥४॥

शिष्टं पुनः किं भूतं सें दुईंदुना ई चंद्रेण सह वर्त्तमानं वामासीं बीदी ई ईकारः
तेन युक्तं एतेन क्रींमिति सिद्धं ॥ हे मातः कीदृशी ध्वांतोनलांधकारैः धाराधरो जल
धरो नवीनमेघस्तयोरु चिर्दीप्तिरिव रुचिरा शोभा देदीप्यमाना यस्याः सा तस्याः
संबोधने हे ॥ अथवा ध्वांतेनांधकारेण सह धाराधरस्तस्य रुचिरिव रुचिरते
षां किंभूतानां सर्वसिद्धियुक्तानामित्यर्थः ॥१॥ ईशानं सेन्दुवामश्रवणपरिग
तं बीजमन्यन्महेशीं द्वंद्वं ते मंद चेता यदि जपति जनो वारमेकं कदाचि
त् ॥ जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षी वृंदं चंद्रार्द्धचूडे

॥५॥ प्रभवतिसमहाघोरत्रावावतंसे॥६॥ हेमहेशीयदिमंदन्वेतामंदबुद्धिर्जनसोत
वअन्यह्रीत्रेहंह्रंह्रयंकश्चिदेकवारं जपतिसजनोवान्वा अधीशं चहस्पतिं
धनदंकुबेरमपिजित्वाचिरकालपर्यंतं। अंबुजाक्षीपमाक्षीतासांवृंदंसमूहं
माहयन्प्रभवतिसमर्थोभवतीसर्थः॥हेचंद्रचूडचूडे अर्द्धचंद्रधारिणी अन्य
ह्रीजमाह॥ईशानेहकारं नादबिंदुनासहउकारयुक्तेनहूंमितिबीजं॥कूर्ची
स्यमितिह्रयं॥२॥श्लोक॥ ईश्रीं वैश्वानरंश्रां अग्निधरविलसद्वामनेत्रेणयु स्थौ
तंबीजंतेहंह्रमन्यह्निगलितचिकुरेकालिकेयेजपंति॥ ह्रष्टारंघ्नंतिते च त्रिभुव ॥५॥
नमपितावश्यभावं नयंतिसृक्कं हंह्रास्यधाराह्रयधरवदनेदक्षिणेकालिके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति॥ ३१॥ हे विगलितचिकुरे मुक्तकेशि कालिके ये जनाः सो तव अन्यद्बीजं हूंहूं युगलं जपंति॥ ते जनाः द्वेष्टारं शत्रुं घ्नंति॥ अभितः सर्वतो भावेन त्रिभुवनं वश्यभावं नयं ति॥ किंभूते रक्तद्वंद्वं तस्मात् रत्याराद्ध्यपरं वदनं यस्याः सा तत्संबोधने॥ हे दक्षि णकालिके ति संबोधिरत्र छंदसतात्॥ अन्यद्बीजमाह॥ ईश्वरेति॥ वोहकारः वैश्वानर स्यो वन्हिर्बीजस्यो रेफस्यः॥ नाशिकाधरविलसत्ता अर्द्धचंद्रेण सह वामनेत्रेण दीर्घ ईकारेण युक्तं केवलं नादस्यो मायारितता दत्तविंदु र्लक्ष्यते। एतेन भुवनेश्वरी बीजं जातं॥ ३१॥ श्लोकः॥ ऊर्ध्वं वामे हृपाणं करकमलतले छिन्नमुंडं तताधः सव्ये भीतिं वरं च त्रिजगदघहरे दक्षिणकालिकेति॥ जपैतन्नामयैवैतव विमलतनुं भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥ वयंसेवमेवतेषामष्टौकरस्थाः प्रकटितवदने सिद्धय स्त्र्यंबकस्य॥ ८॥ हेत्रिजगताम
घंपापंहरे दक्षिणकालिके चैतन्नाम जप्त्वा तवविमलतनुं निस्संदेहीप्यमानं तनुं ब्र
ल स्वरूपं ये भावयंति हे अंबे हे मातः प्रकटितं विस्तारितं वदनं यस्याः सा तत्संबो
धने तेषां जनानामेव त्र्यंबकस्य शिवस्य अष्टौ सिद्धयः करस्था भवंति॥ स्वरू
पमाह॥ वामे वामभुजे सव्ये दक्षिणभुजे च करकमलतले ऊर्ध्वं स्तपाणं तदधः स्त
२ द्धं एवमूर्ध्वमभयं तदधो वरं च दधाने धृतवतीति भावः। चतुर्भुजात्वमिति सूचितं॥
॥ क्लीं॥ वर्गाद्यं वह्निमुक्तं विधुरतिललितं तत्त्रयं कूर्चयुग्मं लज्जाद्वंद्वं च पश्चा ॥६॥
स्मितमुखि तदधष्ठद्वयं योजयित्वा॥ मातर्ये ये जपंति स्मरहरमहिले भावयंतः

स्वरूपं ते लक्ष्मी लास्यलीला कमलदलदृशः कामरूपा भवंती ॥ ५ ॥ मंत्रं संपूर्णा जपफ
लमाह ॥ वर्गाद्यमिति हे स्मित मुखि हास्यानने मातः स्मरं हरस्य शिवस्य महिले गेहिनी वर्ग
घं ककारं वह्नियुक्तं रेफयुक्तं विधुश्चंद्रो रतिरीकारः ताभ्यां ललितं भूषितं एतद्बीजत्रयं कू
र्चयुग्मं लज्जामाया युग्मं तदधः पश्चात् ठद्वयं स्वाहा योजयित्वा ये जनाः साधका जपं
ति ते जनाः लक्ष्मी लास्यली लाकमलदलदृशः लक्ष्मीविलासकमलसदृश्याः
कामरूपा कंदर्परूपा बहुरूपधरा वा सर्वत्र विजयिनो भवंति ॥ ते किंभूताः ते तव स्वरूपं भाव
यंतश्चिंतयंतः ॥ ५ ॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं ते न्नाम्ना योजयि
त्वा सकलमपि सदा भावयंतो जपंति ॥ तेषां नेत्रारविंदे विहरति कमलावक्त्रशुभ्रांशुबिंबे

॥७॥

वाग्देवी देवि मुंडस्रगतिच्छायलसत्कंठि पीनस्तनाढ्ये॥ ॥ ६॥ पुनर्मंत्रभेदेन स्तुति
माह॥ अस्यार्थः हे देवि हे दीप्यमाने ये साधकाः एकमेकं प्रत्येकं पृथक् पृथक् बीज
स्वरूपं वा द्वयं वा त्रयं वा बीजं चकारात् इत इतिरिक्तपरं प्रणववाग्भवादिबीजमस्तं
तगुह्यं तन्नाम्ना तव नाम्ना यो जयिता स सदा सर्वदा नित्यरूपेण सकलं मंत्रमपि भा
वयंतः संतो जपंति। तेनैवेपि वा तव मंत्रभेदांश्च जपंतीति भावः॥ तेषां जनानां ने
त्रारविंदे चक्षुःपद्मे कमला लक्ष्मीः वक्त्राम्भोजबिंबे मुखसादृश्ये वाच्यासंस्त
तादीनां देवी सरस्वती विहरति क्रीडां करोति। किंभूते मुंडानां स्रजा मालया तिच्छाय
मसंततेन लसत् स्वर्चितं कंठं यस्याः सा तत्संबोधने। हे पीनस्तनाढ्ये॥ ६॥ श्लो॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतासूनां बाहुप्रकरकृतकांचीपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिन
यनां ॥ श्मशानस्थां तल्पे शवहृदि महाकालसुरतप्रसक्तां तां ध्यायन् जननि जड
चेता अपि कविः ॥ इदानीं ध्यानस्तवमाह ॥ गतासूनामिति ॥ हे जननि जडे चेता
मेदबुद्धिरपि निश्चये ॥ शवानां शयनं श्मशानं तत्र तिष्ठतीति ॥ तत्र शवहृदि तल्पे श
आयां त्रिभुवनविधात्रीं त्रिभुवनजननीं तां ध्यायन् सन् कविः स्यात् ॥ किंभूतां नियै
नेनां त्रिनेत्रां दिगेव वस्त्रं यस्याः सा तां दिगंबरीं गतासूनां गतप्राणानां शवानां बाहूनां
हस्तानां प्रकराः समूहास्तैः कृतकांचिक्षुद्रमेखलां ताभिः परिलससरिभूषितं नितंबं
यस्याः सा तां महाकालस्य सुरतस्तेन प्रयुक्तां ॥ ७ ॥ शिवाभिर्घोराभिः शवनिवह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ८ ॥ मुंडास्थिनिकैस्करं संकीर्णायां प्रकटितचितायां हरवधूं ॥ प्रविष्टां संतुष्टामुपरिसुरते नाति
युवतीं सदा तां ध्यायंती कपि चिदपि न तेषां परिभवः ॥ ८ ॥ यत्र नाः सदा तां हरवधूं अति
युवतीं स्थिरयोवनां ध्यायंति तेषां कचिदपि कुत्रापि न परिभवो न पराजयो भवती सर्व
त्र जय इति भावः ॥ किं भूतां उपरि सुरतेन संतुष्टां शिवाभिर्घोराभिः शवनिवहः शवस
मूहः तेषां मुंडानि अस्थिनिकरैः रंद्रैः परं मुत्कटं संकीर्णायां विस्तीर्णायां प्रकटित प्रकाशि
तचितायां प्रविष्टां संस्थितां पीठन्यासानंतरं तामेव ध्यायेदिति भावः ॥ ८ ॥ [illegible] ॥ वश
मस्तो किं वा जननिवयमुच्चैर्जडधियो न धाता नापीशो हरिरपि न ते वेत्ति परमं ॥ तथापि
त्वद्भक्तिर्मुखरयति चास्माकममिते तदेतत् क्षंतव्यं न खलु पशुरोषः समुचितः ॥ ९ ॥ ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साधनतं पीठतत्वं नको जानाती सान्नायेन स्तौति। वृद्दामेति॥ हे जननि वयं त्रउध्धियामंद

बुद्धयः स्वेस्तौतव किं वदामः॥ कथं धाता ब्रह्मा ईशः शिवः हरिरपि विष्णुरपि तत वएत

द्धुस्यमाणं परमं। साधनतत्वं पीठतत्वं च न वत्तिन जानाति॥ हे असितेरूष्णेतद्भक्तिर

स्माकं मुखरयति चपलं करोती त्वया तद्धं तव्यं खलु शिश्च ये पद्मुराषः प्रभुभाव दोषः

न समुचितो नयोग्य इत्यर्थः॥ ९॥ श्लोकः॥ समंदाहपीनस्तनजघनधृग्यौवनव

तीरतासक्तो नरः यदि जपति भक्तः तव मनुं॥ विवासा स्त्वां ध्यायन् गलितचिकुरस्त

स्य वश्यगाः समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥ १०॥ जपसाधनविधिरू

पस्तवमाह॥ समंतादिति॥ हे देवी भक्तो नरः रात्रौ त्वां ध्यायन् चिंतयन् तवमनुं मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९॥ त्वं यदि जपति तदा समस्ताः सिद्धौघाः सिद्धिसमूहास्तस्य वशगाः भवंति । भुवि
पृथिव्यां चिरतरं बहुकालं जीवति कविः स्यात् । भक्तः कथंभूतः गलितचिकुरमुल
कुलः विवासा नग्नः समंतात् सर्वतो वेष्टितः पीनस्तनजघनेध्वषतीतिध्वकूस
चासौ यौवनवती चेति तया ताभिर्वा रता सक्तः क्रीडासक्तः एतेन लतासाधन
मुक्तं ॥१०॥ समासुखीभूतां जनेनि विपरीततामपि सदा विचिंतयंतो ध्यायन् अतिश
यमहाकालसुरतां । तदा तस्य क्षोणीतलविहरमाणस्य विदुषः करांभोजेन स्याह
र वधूमहासिद्धिनिवहः ॥११॥ हे हर वधू यदि भक्तः समासमभावेन अनुद्विग्नचितेनस ॥९॥
दा तां विचिंतयविपरीतां ध्यायं ध्यतव मनुं जपति तदा तस्य जनस्य करांभोजे हस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

प्यते महासिद्धिर्निर्वहा महासिद्धिसमूहः वश्या भवंती ॥ किं भूतस्य तस्य क्षोणी पृथ्वी
तल विहरमाणस्य विदुषः पंडितस्य ज्ञानिनो वा क्षोणीभगमित्ति भावः। तां किं भूतां अति
शायमहाकालेन सुरतां क्रीडितां पुनः किं भूतां सुस्थीभूतां निश्चलां ॥११॥ श्लोकः प्र
सं सूते संसारं जननि जगतीं पालयति च समस्तक्षित्यादि प्रलयसमये संहरति च ॥ अ
त स्त्वं धातापि त्रिभुवनपतिः श्रीपतिरपि महेशोपि प्रायः सकलमपि किं स्तौमि भवतीं ॥१२॥
त्रिगुणपुरुषरूपतस्तुतिमाह ॥ प्रसूत इति ॥ हे जननि संसारं ब्रह्मांडं प्रसूते प्रसवं करो
ति जगतीं पालयति प्रलयसमये क्षयकाले समस्तं ब्रह्मांडं क्षित्यादि संहरति च ॥
अतः कारणात् त्वं धातापि ब्रह्मा रजोगुणः त्रिभुवनपतिः श्रीपतिर्लक्ष्मीपतिः हरिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ रपि सत्वगुणः। प्रायः अंशकलया अंशरूपया सहवर्तमानं सकले शक्रादिरूपं सर्व

देवतमपि भवतीं जगन्मयीं किं स्तौमि किं स्तवनं करोमि ॥१२॥ अनेके ... वं ते भव दृधि

कगीर्वाणनिवहान् विमूढास्ते मा ... तः किमपि न हि जानंति परमं ॥ समाराध्यामद्यां

हरिहरविरिंच्यादिविबुधैः प्रपन्नोस्मि स्वैरं रतिरसमहानंदनिरतां ॥१३॥ हे मातः

अनेके स्मृतिविदो जना भवदृधिकगीर्वाणनिवहान् तु दृधिक देवसमूहम् दृस

यादीन् सेवंते जनाः तितिमूढा अतिमूढाः ते तव परमं महिमानं किमपि न हि जानं

ति। स्वैरं स्वच्छंदं तव तपया हं तां प्रपन्नोस्मि प्रपन्नो भवामि तां किं भूतां आद्यां

रतिरसेन निसक्रीडारसेन महानंदनिरतां हरिहरविरिंच्यादिविबुधैर्देवैः समारा

[OrderDescription]
,CREATED=22.01.20 10:08
,TRANSFERRED=2020/01/22 at 10:23:06
,PAGES=19
,TYPE=STD
,NAME=S0002593
,Book Name=M-2308-RASPANCHADHYAYI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection